तत्पर्य्यायः । परिच्छदः २ परिवर्हः ३ तन्त्रम् ४ । इति हेमचन्द्रः ॥ भोजनादौ व्यञ्जनादि ॥ यथा । "तस्मादन्नं प्रधानं पूपादिकन्तु उपकरणत्वेन शक्तानामावश्यकम्" । इति श्राद्धतत्त्वम् ॥ पूजादौ नैवेद्यादि । मृगबन्धनादौ जालादि ॥

उपकारः, पुं, (उप + कृ + घञ् ।) उपकृतिः । ("उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः" । इति माघः । २।३७॥ "कृतोपकारेव रतिर्बभूव" । इति कुमारे । ३ । ७३ ॥) विकीर्णपुष्पादिः । इति हेमचन्द्रो मेदिनी च ॥

उपकारिका, स्त्री, (उपकरोतीति । उप + कृ + ण्वुल् + टाप् + इत्वम् ।) उपकारकर्त्री । पिष्ट-भेदः । इति मेदिनी ॥ राजगृहम् । इत्यमरः ॥ कुशूलः । मराथि इति भाषा । इति केचिदाहु-रिति भरतः ॥

उपकारी, स्त्री, (उपकारयतीति । उप + कृ + णिच् + अण् + ङीष् ।) राजगृहम् । इति भरतधृत-द्विरूपकोषः ॥

उपकारी, [न्] त्रि, (उपकरोतीति । उप + कृ + णिनि ।) उपकारविशिष्टः । उपकारकर्त्ता । ("उप-कारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम्" इति हितोपदेशे मित्रलाभे ॥)

तत्र दानादानविधिर्यथा । हारीतः । अथासद्-द्रव्यदानमस्वर्ग्यं यच्च दत्त्वा परितप्यते तद्वृदान-मफलं यच्चोपकारिणे ददाति ॥ उपकारिणो व्यस-नोपकारिणे । तदितरोपकारिणे तु दत्तः ।

"मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणे ।
दीनानाथविशिष्टेभ्यो दत्तन्तु सफलं भवेत्" ॥

इति शुद्धितत्त्वम् ॥ किञ्च ।

"उपकारिषु यः साधुः स साधुः सद्भिरुच्यते ।
समदृष्टिर्भवाशु त्वं सर्व्वभूतेषु केशव" ॥

इति जैमिनीये आश्वमेधिके पर्व्वणि ११ अध्यायः॥

उपकार्य्यः, त्रि, (उप + कृ + ण्यत् ।) उपकारोचितः । इति मेदिनी ॥

उपकार्य्या, स्त्री, (उपक्रियते इति । उप + कृ + ण्यत् + टाप् ।) राजगृहम् । इत्यमरः ॥ (पट-मण्डपम् । यथा, रघौ ५ । ४१ ।

"तस्योपकार्य्यारचितोपचारा
वन्येतरा जानपदोपदाभिः" ॥

"शत्रुघ्नप्रतिविहितोपकार्य्यमार्य्यः,
साकेतोपवनमुदारमध्युवास" । इति च १३ । ७९ ।)

कुशूलः । मराथि इति भाषा । इति केचिदाहु-रिति भरतः ॥

उपकुञ्चिः, स्त्री, (उप + कुञ्च + कि ।) सूक्ष्मकृष्णजी-रकः । इति रत्नमाला ॥ (कृष्णजीरकशब्देऽस्य गुणादयो बोध्याः ॥)

उपकुञ्चिका, स्त्री, (उप + कुञ्च + ण्वुल् + टाप् ।) कृष्णजीरकः । सूक्ष्मैला । इत्यमरः ॥

("कारवी करवी तद्वद्विज्ञेया सोपकुञ्चिका ।
भक्ष्यव्यञ्जनभोज्येषु विविधेष्ववचारिता" ॥

इति सूत्रस्थाने ४६ अध्याये सुश्रुतेनोक्तम् ॥)

उपकुम्भं, क्ली, (कुम्भस्य समीपे ।) कुम्भसमीपम् । इति व्याकरणम् ॥

उपकुर्व्वाणः, पुं, (उप + कृ + शानच् ।) ब्रह्मचर्य्या-नन्तरं यो गृहस्थो भवति सः । इति पुराणम् ॥ (कृतोपकारः । यथा हितोपदेशे सुहृद्भेदे,— "यतोऽनुपकुर्व्वाणो न कस्यापि उपायनं गृह्णीयात्" ॥)

उपकुल्या, स्त्री, (उपकोलति । कुल संस्त्याने बन्धुषु च । अघ्न्यादिः ।) पिप्पली । इत्यमरः ॥ पिपुल इति भाषा । ("कृष्णोपकुल्या मगधी" इति वैद्यक-रत्नमाला ॥ "उपकुल्योषणा शौण्डी" इति भाव-प्रकाशे पूर्व्वखण्डे प्रथमभागे ॥ गुणादिकमस्य पिप्पलीशब्दे ज्ञातव्यम् ॥) (उपगता कुल्यामिति वाक्ये वाच्यलिङ्गः । कृत्रिमसरःसमीपम् ॥)

उपकूपजलाशयः, पुं, (उपकूपं कूपसमीपे यो जला-शयः ।) कूपसमीपे शिलादिनिबद्धपशुपानार्थ-कृतकूपोद्धृताम्बुस्थानम् । इत्यमरः ॥

उपक्रान्ता, [ऋ] त्रि, (उप + क्रम + तृच् ।) उप-क्रमकर्त्ता । आरम्भकर्त्ता । इति व्याकरणम् ॥

उपक्रमः, पुं, (उप + क्रम + घञ् । नोदात्तोपदेशस्य इति न वृद्धिः ।) ज्ञात्वारम्भः । अयमस्योपायः अनेनैतत् सिध्यतीति ज्ञात्वा प्रथमारम्भः॥ उपधा । राज्ञा धर्म्मकामार्थभयैः अमात्यादेर्यत् परीक्षणं भावतत्त्वनिरूपणम् ॥ प्रक्रमः । प्रथमारम्भः । इत्यमरः ॥ विक्रमः । चिकित्सा । इति मेदिनी ॥ पलायनम् । इति हेमचन्द्रः ॥ (उपायः । यथा,— "सामादिभिरुपक्रमैः" । इति मनुः । ७ । १०७ । आरम्भः । यथा,—"रामोपक्रममाचख्यौ रक्षः-परिभवं नवम्" ॥ १२ । ४२ । इति रघुः । "उप-क्रम्यते इत्युपक्रमः कर्म्मणि घञ् । रामस्य कर्त्तुरुप-क्रमः रामोपक्रमं रामेणादौ उपक्रान्तमित्यर्थः । उपज्ञोपक्रमं तदाद्याचिख्यासायामिति क्लीवत्वम्" । इति तट्टीका ॥)

उपक्रोशः, पुं, (उप + क्रुश् + घञ् ।) निन्दा । इत्य-मरः ॥ (यथा, रघुः । २ । ५३ ।

"राज्येन किं तद्विपरीतवृत्तेः
प्राणैरुपक्रोशमलीमसैर्व्वा" ॥)

उपक्रोष्टा [ऋ] पुं, स्त्री, (उप + क्रुश + तृच् ।) गर्द्दभः । इति श्रीभागवतम् ॥ निन्दकः ॥

उपक्वाणः, पुं, (उप + क्वण् + अप् ।) प्रक्वाणः । वीणा-शब्दः । इत्यमरटीकायां रायमुकुटः ॥

उपक्षेपणधर्म्मः, पुं, (उपक्षेपणरूपो धर्म्मः ।) शूद्र-स्वामिकान्नस्य पाकार्थं ब्राह्मणगृहे समर्पणम् । इति शुद्धितत्त्वे कल्पतरुः ॥

उपगतः, त्रि, (उप + गम् + क्त ।) अङ्गीकृतः । स्वी-कृतः ॥ इत्यमरः ॥ (यथा रघौ ९ । १५ ।

"उपगतोऽपि च मण्डलनाभिता-
मनुदितान्यसितातपवारणः" ।) कृतमैथुनः ॥

उपगमः, पुं, (उप + गम् + अप् ।) अङ्गीकारः । निकटगमनम् । इति मेदिनी ॥ (यथा रघौ६।६९ ।

"तं प्राप्य सर्व्वावयवानवद्यं
व्यावर्त्ततान्योपगमात् कुमारी" ॥)

उपगूहनं, क्ली, (उप + गूह + ल्युट् ।) आलिङ्गनम् । इत्यमरः ॥ ("स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुनः" ॥ इति भागवते १ । ५ । १९ ॥ तथा च साहित्य-दर्पणे ६ परिच्छेदे ।

"द्युतिः प्रमाद आनन्दः समयोऽप्युपगूहनम्" ॥)

उपग्रहः, पुं, (उपगृह्यते इति । उप + ग्रह + अप् ।) वन्दी । इत्यमरः ॥ वँदुयान् इति भाषा । उप-योगः । अनुकूलः । इति मेदिनी ॥ (ग्रहसदृशो ज्योतिःपदार्थभेदः । यथा महाभारते ३ । स्कन्द-शक्रसमागमे २२६ । १ ॥

"ग्रहाः सोपग्रहाश्चैव ऋषयो मातरस्तथा ।
हुताशनमुखाश्चैव दीप्ताः परिषदां गणाः" ॥)

उपग्रहणं, क्ली, (उप + ग्रह + ल्युट् ।) उपाकरणम् । संस्कारपूर्व्वकश्रुतिग्रहणम् । इत्यमरटीकायां रायमुकुटः ॥ स्वीकारः । यथा, रामायणे १ ।४।४।

"वेदोपग्रहणार्थाय तावग्राहयत प्रभुः" ।

वेदोपबृंहणार्थाय इति पाठान्तरम् ॥)

उपग्राह्यः, पुं, (उपगृह्यते इति । उप + ग्रह + ण्यत् ।) उपढौकनम् । इत्यमरः ॥ भेटी डालि इत्यादि भाषा ॥

उपघातः, पुं, (उपहन्यते अनेन । उप + हन + करणे घञ् ।) रोगः । इति राजनिर्घण्टः ॥ (भावे घञ् । विनाशः । यथा,—

"तथात्वञ्चेदिन्द्रियाणामुपघाते कथं स्मृतिः" ।

इति भाषापरिच्छेदे । ४८ । अपकारः ।

"स्त्रीणाञ्च प्रेक्षणालम्भमुपघातं परस्य च" ॥

इति मनुः । २ । १७९ ॥)

उपघ्नः, पुं, (उप + हन + क ।) निकटाश्रयः । इत्य-मरः ॥ (यथा, रघुः । १५ । १ ।

"क्लेदादिवोपघ्नतरोर्व्रतत्यौ" ॥)

उपचक्रः, पुं, (चक्रेण चक्रनाम्ना तुल्यः ।) चक्रवाकपक्षि-विशेषः । अस्य मांसगुणाः । लघुत्वम् । हृद्यत्वम् । उष्णवीर्य्यत्वम् । कटुपाकित्वम् । बलाग्निवृद्धिका-रित्वञ्च । इति राजवल्लभः ॥

("चकोरैरुपचक्रैश्च पक्षिभिर्जीवजीवकैः" ॥

इति महाभारते ३ भीमस्याजगरग्रहणे १७८ ।७॥)

उपचक्षुः, [स्] क्ली, (उपगतं चक्षुषोर्दर्शनार्थम् ।) दिव्यचक्षुः । चश्मा इति पारस्यभाषा । इति लोकप्रसिद्धम् ॥

उपचयः, पुं, (उप + चि + अच् ।) वृद्धिः । उन्नतिः । ("स्वशक्त्युपचये केचित् परस्य व्यसने परे" । इति माघः । २ । ५७ । "तदेतेषामस्मत्पुत्राणां ज्ञानोपचये भवन्तः प्रमाणम्" । इति हितोप-देशे कथामुखम् ।) लग्नात् तृतीयषष्ठदशमैका-दशस्थानानि । इति ज्योतिषम् ॥

उपचरितं, त्रि, (उपचर्य्यते स्म । उप + चर + क्त ।) उपासितम् । सेवितम् । इत्यमरः ॥

उपचर्य्या, स्त्री, (उप + चर + क्यप् + टाप् ।) चि-कित्सा । इति हलायुधः ॥

उपचाय्यः पुं, (उपचीयतेऽग्निरस्मिन् इति । "अग्नौ परिचाय्योपचाय्यसमूह्याः" ३।१।१३१ । इतिण्य-दायादेशौ निपात्येते । उप + चि + ण्यत् ।) यज्ञा-ग्निः । इत्यमरः ॥

उपचार, पुं, (उप + चर + घञ् ।) रोगप्रतिकार ।